| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णौदानम्। | दक्षिणा। |
|---|---|---|---|---|
| पतितान्नम्। अवक्षुतान्नम्। क्षवथुसहितान्नमित्यर्थः। पिशुनान्नम्। | एतेषामभोज्यानामन्यतमानां भक्षणे पूर्व्वोक्तमेकाहोपवासः। एष सकृदज्ञानविषयः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| अनृतिनामन्नम्। कूटसाक्ष्याद्यन्नमित्यर्थः। यज्ञफलविक्रायकान्नम्। शैलूषान्नम्। तुन्नवायान्नम्। कृतघ्नान्नम्। कर्म्मारान्नम्। निषादान्नम्। रङ्गावतारकान्नम्। स्वर्णकारान्नम्। वेणुजीविनामन्नम्। लौहविक्रायकान्नम्। श्ववतामन्नम्। आखेटकार्थं शुनः पोषकाणामन्नमित्यर्थः। शौण्डिकवृत्तिद्विजान्नम्। चैलनिर्णेजकस्यान्नम्। वस्त्रधावकस्यान्नमित्यर्थः। रजकान्नम्। कुसुम्भादिना वस्त्ररागकारकस्यान्नमित्यर्थः। नृशंसान्नम्। गृहस्थितोपपतिकान्नम्। उपपतिमर्षकान्नम्। गेहे ज्ञातं भार्य्याजारं ये सहन्ते तेषामन्नमित्यर्थः। स्त्रीजितान्नम्। अनिर्द्दशं प्रेतान्नम्। अनिर्गताशौचस्य सूतिकान्नमित्यर्थः। अतुष्टिकरान्नञ्च ॥७०॥ | ज्ञाने प्राजापत्यम्। क्षत्रियादीनां पादपादह्रानिः। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| चाण्डालादिपतितस्पृष्टान्नभक्षणम्। अत्र पतितपदं सर्व्वधर्म्मबहिष्कृतवाचि यवनादिम्लेच्छपरं उच्छिष्टान्नभोजनप्रकरणे तथा लिखनात् अतएव चाण्डालस्पृष्टान्नभक्षणप्रतिज्ञायां पतितपदं पृथक् न लिखितम्। | प्राजापत्यम्। एतत्सकृदज्ञाने ब्राह्मणविषयम्। ज्ञाने द्वैगुण्यम्। अभ्यासे तु प्रायश्चित्तावृत्तिः। क्षत्रियादीनां पाद-पादह्रानिः। एतत्कृच्छ्रादिष्वभ्यासे ज्ञेयम्। रजकादिस्पृष्टान्नभक्षणे तु एतदर्द्धम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| पतितस्पर्शे अकृतस्नातस्य भोजनम्। | याज्ञवल्क्योक्तचतुरहःसाध्यं तप्तकृच्छ्रम्। | सपादधेन्वसम्भवात् २ धेनू। | ३॥० कार्षापणाः। | यथाशक्ति। |
| | अज्ञानत एतदर्द्धम्। अभ्यासे प्रायश्चित्तावृत्तिः। | | | |
| | अत्यन्ताभ्यासे चान्द्रायणम्। क्षत्रियादीनां पादपादह्रानिः। चाण्डालादिस्पर्शे एतद्बोधितव्यम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| शूद्रादिस्पृष्टान्नस्य केशकीटोपहतान्नस्य च भक्षणम्। | एकोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| वृथापाकान्नभक्षणम्। तत्तु देवतापितृतिथिभक्षणवर्जितान्नम्। | प्राणायामत्रयम् घृतमात्रभोजनञ्च। एतदज्ञानतः। ज्ञानतो द्वैगुण्यम्। | ० | ॥० पणाः। | यथाशक्ति। |